# Devaih Kritam 07 Devi Stotram

# દેવૈઃ કૃતં ૭ દેવીસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam 07 Devi Stotram

File name : devaiHkRRitaM07devIstotram.itx

Category : devii, devI, devIbhAgavatapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : devIbhAgavatam | skandha 5 | adhyAya 22/22-42||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

Devaih Kritam 07 Devi Stotram

# દેવૈઃ કૃતં ૭ દેવીસ્તોત્રમ્

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા દેવાસ્તે પ્રયયુર્ગિરિમ્ ॥ ૨૨॥

હિમાલયં મહારાજ દેવીધ્યાનપરાયણાઃ ।
માયાબીજં હૃદા નિત્યં જપન્તઃ સર્વ એવ હિ ॥ ૨૩॥

નમશ્ચક્રુર્મહામાયાં ભક્તાનામભયપ્રદામ્ ।
તુષ્ટુવુઃ સ્તોત્રમન્ત્રૈશ્ચ ભક્ત્યા પરમયા યુતાઃ ॥ ૨૪॥

નમો દેવિ વિશ્વેશ્વરિ પ્રાણનાથે સદાનન્દરૂપે સુરાનન્દદે તે ।
નમો દાનવાન્તપ્રદે માનવાના- મનેકાર્થદે ભક્તિગમ્યસ્વરૂપે ॥ ૨૫॥

ન તે નામસઙ્ખ્યાં ન તે રૂપમીદૃ- ક્તથા કોઽપિ વેદાદિદેવસ્વરૂપે ।
ત્વમેવાસિ સર્વેષુ શક્તિસ્વરૂપા પ્રજાસૃષ્ટિસંહારકાલે સદૈવ ॥ ૨૬॥

સ્મૃતિસ્ત્વં ધૃતિસ્ત્વં ત્વમેવાસિ બુદ્ધિર્જરા પુષ્ટિતુષ્ટી ધૃતિઃ કાન્તિશાન્તી ।
સુવિદ્યા સુલક્ષ્મીર્ગતિઃ કીર્તિમેધે ત્વમેવાસિ વિશ્વસ્ય બીજં પુરાણમ્ ॥ ૨૭॥

યદા યૈઃ સ્વરૂપૈઃ કરોષીહ કાર્યં
સુરાણાં ચ તેભ્યો નમામોઽદ્ય શાન્ત્યૈ ।
ક્ષમા યોગનિદ્રા દયા ત્વં વિવક્ષા
સ્થિતા સર્વભૂતેષુ શસ્તૈઃ સ્વરૂપૈઃ ॥ ૨૮॥

કૃતં કાર્યમાદૌ ત્વયા યત્સુરાણાં હતોઽસૌ મહારિર્મદાન્ધો હયારિઃ ।
દયા તે સદા સર્વદેવેષુ દેવિ પ્રસિદ્ધા પુરાણેષુ વેદેષુ ગીતા ॥ ૨૯॥

કિમત્રાસ્તિ ચિત્રં યદમ્બા સુતં સ્વં મુદા પાલયેત્પોષયેત્સમ્યગેવ ।
યતસ્ત્વં જનિત્રી સુરાણાં સહાયા કુરુષ્વૈકચિત્તેન કાર્યં સમગ્રમ્ ॥ ૩૦॥

ન વા તે ગુણાનામિયત્તાં સ્વરૂપં વયં દેવિ જાનીમહે વિશ્વવન્દ્યે ।
કૃપાપાત્રમિત્યેવ મત્વા તથાસ્માન્

ભયેભ્યઃ સદા પાહિ પાતું સમર્થે ॥ ૩૧॥

વિના બાણપાતૈર્વિના મુષ્ટિઘાતૈર્વિના શૂલખડ્ગૈર્વિના શક્તિદણ્ડૈઃ ।
રિપૂન્હન્તુમેવાસિ શક્તા વિનોદા- ત્તથાપીહ લોકોપકારાય લીલા ॥ ૩૨॥

ઇદં શાશ્વતં નૈવ જાનન્તિ મૂઢા ન કાર્યં વિના કારણં સમ્ભવેદ્ધા ।
વયં તર્કયામોઽનુમાનં પ્રમાણં ત્વમેવાસિ કર્તાસ્ય વિશ્વસ્ય ચેતિ ॥ ૩૩॥

અજઃ સૃષ્ટિકર્તા મુકુન્દોઽવિતાયં હરો નાશકૃદ્વૈ પુરાણે પ્રસિદ્ધઃ ।
ન કિં ત્વત્પ્રસૂતાસ્ત્રયસ્તે યુગાદૌ ત્વમેવાસિ સર્વસ્ય તેનૈવ માતા ॥ ૩૪॥

ત્રિભિસ્ત્વં પુરાઽઽરાધિતા દેવિ દત્તા ત્વયા શક્તિરુગ્રા ચ તેભ્યઃ સમગ્રા ।
ત્વયા સંયુતાસ્તે પ્રકુર્વન્તિ કામં જગત્પાલનોત્પત્તિસંહારમેવ ॥ ૩૫॥

તે કિં ન મન્દમતયો યતયો વિમૂઢા-
સ્ત્વાં યે ન વિશ્વજનનીં સમુપાશ્રયન્તિ ।
વિદ્યાં પરાં સકલકામફલપ્રદાં તાં
મુક્તિપ્રદાં વિબુધવૃન્દસુવન્દિતાઙ્ઘ્રિમ્ ॥ ૩૬॥

યે વૈષ્ણવાઃ પાશુપતાશ્ચ સૌરા દમ્ભાસ્ત એવ પ્રતિભાન્તિ નૂનમ્ ।
ધ્યાયન્તિ ન ત્વાં કમલાઞ્ચ લજ્જાં કાન્તિં સ્થિતિં કીર્તિમથાપિ પુષ્ટિમ્ ॥ ૩૭॥

હરિહરાદિભિરપ્યથ સેવિતા ત્વમિહ દેવવરૈરસુરૈસ્તથા ।
ભુવિ ભજન્તિ ન યેઽલ્પધિયો નરા જનનિ તે વિધિના ખલુ વઞ્ચિતાઃ ॥ ૩૮॥

જલધિજાપદપઙ્કજરઞ્જનં જતુરસેન કરોતિ હરિઃ સ્વયમ્ ।
ત્રિનયનોઽપિ ધરાધરજાઙ્ઘ્રિપં- કજપરાગનિષેવણતત્પરઃ ॥ ૩૯॥

કિમપરસ્ય નરસ્ય કથાનકૈ- સ્તવ પદાબ્જયુગં ન ભજન્તિ કે ।
વિગતરાગગૃહાશ્ચ દયાં ક્ષમાં કૃતધિયો મુનયોઽપિ ભજન્તિ તે ॥ ૪૦॥

દેવિ ત્વદઙ્ઘ્રિભજને ન જના રતા યે
સંસારકૂપપતિતાઃ પતિતાઃ કિલામી ।
તે કુષ્ઠગુલ્મશિરાધિયુતા ભવન્તિ
દારિદ્ર્યદૈન્યસહિતા રહિતાઃ સુખૌઘૈઃ ॥ ૪૧॥

યે કાષ્ઠભારવહને યવસાવહારે
કાર્યે ભવન્તિ નિપુણા ધનદારહીનાઃ ।
જાનીમહેઽલ્પમતિભિર્ભવદઙ્ઘ્રિસેવા

પૂર્વે ભવે જનનિ તૈર્ન કૃતા કદાપિ ॥ ૪૨॥

ઇતિ દેવીભાગવતે પઞ્ચમસ્કન્ધે ૨૨-અધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં દેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

દેવીભાગવતમ્ । સ્કન્ધ ૫। અધ્યાય ૨૨/૨૨-૪૨॥

devIbhAgavatam . skandha 5. adhyAya 22/22-42..

Proofread by PSA Easwaran

*Devaih Kritam 07 Devi Stotram*
pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*